CC-0. Digitized by eGangotri and MIDF- Delhi



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीः निधायहृदिविश्वेशंविधायगुरुवंदनं। बालानांसुखबोधायक्रियतेतर्कसंग्रहः १ द्रव्यगुणकर्मसा
मान्यविशेषसमवायाभावाःसप्तैवपदार्थाः। तत्रद्रव्याणि। पृथिव्यप्तेजोवायाकाशकालदिगात्ममनांसि
नवैव। रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुख
दुःखेच्छाद्वेषप्रयत्नधर्माऽधर्मसंस्काराश्चतुर्विंशतिर्गुणाः। उत्क्षेपणाऽपक्षेपणाकुंचनप्रसारणगमनानिपंचै
कर्माणि। सामान्यंद्विविधं परमपरंचेति। विशेषास्तुनित्यद्रव्यवृत्तयोऽनंताएव। समवायस्त्वेकएव। अभा
वश्चतुर्विधः। प्रागभावप्रध्वंसाभावोत्यंताभावोन्योन्याभावश्चेति। गंधवतीपृथिवी। सा द्विविधानित्यानित्या
चेति। नित्यापरमाणुरूपा। अनित्याकार्यरूपा। पुनस्त्रिविधा। शरीरेंद्रियविषयभेदात्। शरीरमस्मदादीनां।
इंद्रियंगंधग्राहकंघ्राणंनासाग्रवर्ति। विषयोभूम्यादिः। शीतस्पर्शवत्यआपः। ताद्द्विविधाः। नित्याअ
नित्याश्च। नित्याः परमाणुरूपाः। अनित्याःकार्यरूपाः। पुनस्त्रिविधाः। शरीरेंद्रियविषयभेदात्। शरीरं

जालान्तरगतेभानौयत्सूक्ष्मंदृश्यतेरजः तस्यषष्टतमोभागःपरमाणुरुदीर्तितः ३

राम:
१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वरुणलोके · इंद्रियंरसग्राहकंरसनंजिह्वाग्रवर्त्ति · विषयःसरित्समुद्रादिः · उष्णस्पर्शवन्तेजः · तत्द्विविधम्·
नित्यमनित्यंच · नित्यपरमाणुरूपम् · अनित्यंकार्यरूपं · पुनस्त्रिविधम् · शरीरेंद्रियविषयभेदात् · शरीरमा
दित्यलोके · इंद्रियंरूपग्राहकंचक्षुःकृष्णतारायवर्त्ति · विषयश्चतुर्विधः · भौमदिव्योदर्याकरजभेदात् · भौमं
वह्न्यादि · अदिव्यंदिव्यंविद्युदादि · भुक्तस्यपरिणामहेतुरोदर्यं · आकरजंसुवर्णादि · रूपरहितस्पर्शवान्
वायुः · सद्विविधः · नित्योऽनित्यश्च · नित्यःपरमाणुरूपः · अनित्यःकार्यरूपः · पुनस्त्रिविधः · शरीरेंद्रि
यविषयभेदात् · शरीरंवायुलोके · इंद्रियंस्पर्शग्राहकंत्वक्सर्वशरीरवर्त्ति · विषयोवृष्ट्यादिकंप्रहेतुः · श
रीरंतःसंचारीवायुःप्राणः · सचैकोप्युपाधिभेदात्प्राणापानादिसंज्ञांलभते · शब्दगुणमाकाशं · तच्चै
कंविभुनित्यंच · अतीतादिव्यवहारहेतुःकालः · सचैकोविभुर्नित्यश्च · प्राच्यादिव्यवहारहेतुर्दिक् · सा
चैकानित्याविभ्वीच · ज्ञानाधिकरणमात्मा · सद्विविधः · परमात्माजीवात्मेति · तत्रेश्वरःसर्वज्ञःप

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रमात्मासकस्य · जीवात्मात्रनिशरीरंभिन्नोविभुर्नित्यश्च · सुखाद्युपलब्धिसाधनमिंद्रियंमनः · तच्चप्रत्या
त्मनियतत्वादनेकं · परमाणुरूपंनित्यंच · चक्षुर्मात्रग्राह्योगुणोरूपं · तच्चशुक्लनीलपीतरक्तहरितकपि
शचित्रभेदात्सप्तविधं · पृथिव्यप्तेजोवृत्ति · तत्रपृथिव्यांसप्तविधं · अभास्वरशुक्लंजले · भास्वरशुक्लंते
जसि · रसनाग्राह्योगुणोरसः · सचमधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः · पृथिवीजलवृत्तिः
तत्रपृथिव्यांषड्विधः · जलेमधुरएव · घ्राणग्राह्योगुणोगंधः · सद्विविधः · सुरभिरसुरभिश्च · पृथिवी
मात्रवृत्तिः · त्वगिंद्रियमात्रग्राह्योगुणःस्पर्शः · सत्रिविधः · शीतोष्णोऽनुष्णशीतभेदात् · पृथिव्यप्तेजो
वायुवृत्तिः · तत्रशीतोजले · उष्णस्तेजसि · अनुष्णशीतपृथिवीवाय्वोः · रूपादिचतुष्टयंपृथिव्यांपाकजन्म
नित्यं · अन्यत्रापाकजंनित्यमनित्यंच · नित्यगतंनित्यं · अनित्यगतमनित्यं · एकत्वादिव्यवहारहेतुः
संख्या · नवद्रव्यवृत्तिः · एकत्वादिपरार्द्धपर्यंता · एकत्वंनित्यगतंनित्यं · अनित्यगतमनित्यं · द्वित्वादिकं

रामः २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नुसर्वत्रानित्यमेव. मानव्यवहारसाधारणकारणंपरिमाणं. नवद्रव्यवृत्ति. नच्चतुर्विधं. अणुमहद्दीर्घह्र
स्वेचेति. पृथक्त्वव्यवहारसाधारणकारणंपृथक्त्वं. सर्वद्रव्यवृत्ति. संयुक्तव्यवहारहेतुःसंयोगः. नवद्रव्य
वृत्तिः. संयोगनाशकोगुणोविभागः. सर्वद्रव्यवृत्तिः. परापरव्यवहारकारणापरत्वापरत्वे. तद्विविधे. दि
क्कृतेकालकृतेचेति. दूरस्थदिक्कृतंपरत्वं. समीपस्थदिक्कृतमपरत्वं. ज्येष्ठकालकृतंपरत्वं. कनिष्ठकालकृ
तमपरत्वं. आद्यपतनासमवायिकारणंगुरुत्वं. पृथिवीजलवृत्ति. स्पंदनासमवायिकारणंद्रवत्वं. पृ
थिव्यंतेजोवृत्ति. तद्विविधं. सांसिद्धिकंनैमित्तिकंच. सांसिद्धिकंजले. नैमित्तिकंपृथिवीतेजसोः. पृथि
व्यांघृतादौअग्निसंयोगजन्यंद्रवत्वं. तेजसिसुवर्णादौ. चूर्णादिपिंडीभावहेतुर्गुणःस्नेहः. जलमात्रवृ
त्तिः. श्रोत्रग्राह्योगुणःशब्दः आकाशमात्रवृत्तिः. सचद्विविधः. ध्वन्यात्मकोवर्णात्मकश्चेति. ध्वन्यात्म
कोभेर्यादौ. वर्णात्मकःसंस्कृतभाषारूपः. सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानं. साद्विविधा. स्मृतिरनुभवश्च.

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कारजन्यंज्ञानंस्मृतिः । तद्भिन्नंज्ञानमनुभवः । सद्विविधः । यथार्थोऽयथार्थश्च । तद्वतितत्प्रकारकानुभवोयथार्थः । सएवप्रमेत्युच्यते । तदभाववतितत्प्रकारकानुभवोऽयथार्थः । यथार्थानुभवश्चतुर्द्धा । प्रत्यक्षानुमितिउपमितिशाब्दभेदात् । तत्करणमपिचतुर्द्धा । प्रत्यक्षानुमानोपमानशब्दभेदात् । व्यापारवत्त्वेसतिअसाधारणंकारणंकरणं । अन्यथासिद्धकार्यनियतपूर्ववर्त्तिकारणं । कार्यंप्राग्भावप्रतियोगि । कारणंत्रिविधं । समवाय्यसमवायिनिमित्तभेदात् । यत्समवेतंकार्यमुत्पद्यतेतत्समवायिकारणं । यथातन्तवःपटस्य । पटश्चस्वगतरूपादेः । कार्यंकारणानवयवेकस्मिन्नर्थेसमवेतत्वेसतिकारणमसमवायिकारणं । यथातन्तुसंयोगःपटस्य । तन्तुरूपंपटरूपस्य । तदुभयभिन्नंकारणंनिमित्तकारणं । यथातुरीवेमादिकंपटस्य । तदेतत्त्रिविधकारणमध्येयदसाधारणंतदेवकरणं । तत्रप्रत्यक्षज्ञानकरणंप्रत्यक्षं । इंद्रियार्थसन्निकर्षजन्यंज्ञानंप्रत्यक्षं । तद्विविधं । निर्विक

तन्नन्यनेसतितन्न-न्यजनको व्यापारः३

रामः ३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ल्पकंसविकल्पकंच· निःप्रकारकंज्ञानंनिर्विकल्पकं· सप्रकारकंज्ञानंसविकल्पकं· यथादित्थोयंब्रा
ह्मणायंश्याभोयमिति· प्रत्यक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षःषड्विधः· संयोगःसंयुक्तसमवायः· सं
युक्तसमवेतसमवायः· [redacted] ·समवायः· समवेतसमवायः· विशेषणाविशेष्य
भावश्चेति· चक्षुषाघटप्रत्यक्षजननेसंयोगःसन्निकर्षः· घटरूपप्रत्यक्षजननेसंयुक्तसमवायःस
न्निकर्षः· चक्षुसंयुक्तेघटेरूपस्यसमवायात्· रूपत्वसामान्यप्रत्यक्षेसंयुक्तसमवेतसमवायः· च
क्षुःसंयुक्तेघटेरूपसमवेतंतत्ररूपत्वस्यसमवायात्· श्रोत्रेणशब्दसाक्षात्कारेसमवायःसन्निकर्षः·
कर्णविवरवर्त्याकाशस्यश्रोत्रत्वात्· शब्दस्याकाशविशेषगुणत्वात्· गुणगुणिनोश्चसमवायात्·
श्रोत्रेणशब्दत्वसाक्षात्कारेसमवेतसमवायःसन्निकर्षः· श्रोत्रसमवेतेशब्दशब्दत्वस्यसमवायात्· अभा
वप्रत्यक्षेविशेषणाविशेष्यभावः सन्निकर्षः· घटाभाववद्भूतलमित्यत्रचक्षुःसंयुक्तेभूतलेघराभाव

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यविशेषणात्वात् · एवंसन्निकर्षषट्कजन्यंज्ञानंप्रत्यक्षं · तत्करणमिंद्रियं · तस्माद्दिंद्रियंप्रत्यक्षे
प्रमाणमितिसिद्धं · इतिप्रत्यक्षप्रमाणं · अनुमितिकरणमनुमानं · परामर्षजन्यंज्ञानमनुमितिः ·
व्याप्तिविशिष्टपक्षधर्मताज्ञानंपरामर्षः · यथावह्निव्याप्यधूमवानयंपर्वतइतिज्ञानंपरामर्षः · त
ज्जन्यपर्वतोवह्निमानितिज्ञानंअनुमितिः · यत्रधूमस्तत्राग्निरितिसाहचर्येनियमोव्याप्तिः · व्या
प्यस्यपर्वतादिवृत्तित्वंपक्षधर्मता · अनुमानंद्विविधं · स्वार्थंपरार्थंच · स्वार्थंस्वार्थानुमितिर
हेतुः · तथाहि · स्वयमेवभूयोदर्शनेनयत्रधूमस्तत्राग्निरितिमहानसादौव्याप्तिंगृहीत्वापर्व
तसमीपगतस्तज्ञानेचाग्नेःसंदिहानः पर्वतवह्निनींधूमलेखांपश्यन्व्याप्तिंस्मरतियत्रधूमस्तत्राग्नि
रिति · तदनंतरंच ह्रियाप्यधूमवानयंपर्वतइतिज्ञानंमुत्पद्यते · अयमेवलिंगपरामर्षइत्युच्यते · तस्मात्पर्वतोवह्रिमानितिज्ञानमनुमितिरुत्पद्यते · तत्स्वार्थानुमानं · यत्तुस्वयमेवधूमादग्निम

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नुमानपरबोधयितुंपंचावयववाक्यंप्रयुज्यतेतत्परार्थानुमानं · यथा · पर्वतोयंवह्निमान् · धूमवत्वात् ·
योयोधूमवान्स वह्निमान् · यथामहानसः · तथाचायं · तस्मात्तथेति · अनेनप्रतिपादितालिंगा
त्परोप्यग्निंप्रतिपद्यते · प्रतिज्ञाहेतूदाहरणोपनयनिगमनानिपंचावयवाः · पर्वतोवह्निमानिति
प्रतिज्ञा · धूमवत्वादितिहेतुः · योयोधूमवानित्युदाहरणं · तथाचायमित्युपनयः · तस्मात्तथेति
निगमनं · स्वार्थानुमितिपरार्थानुमित्योर्लिंगपरामर्षएवकरणं · तस्माल्लिंगपरामर्षोनुमानं · त
ल्लिंगंत्रिविधं · अन्वयव्यतिरेकि · केवलान्वयि · केवलव्यतिरेकीति · अन्वयेनव्यतिरेकेणच
व्याप्तिमदन्वयव्यतिरेकी · यथावह्नीसाध्येधूमवत्वं · यत्रधूमस्तत्राग्निरितिअन्वयव्याप्तिः · यत्रव
ह्निर्नास्तितत्रधूमोनास्ति · यथाजलहृदइतिव्यतिरेकव्याप्तिः · अन्वयमात्रव्याप्तिःकेवलान्वयिः
यथाघटोभिधेयः · प्रमेयत्वात् · पटवत् · अत्रप्रमेयत्वाभिधेययोर्व्यतिरेकव्याप्तिर्नास्ति · सर्वस्या ल१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भिधेयत्वात्प्रमेयत्वाच्च । व्यतिरेकमात्रव्याप्तिर्केवलव्यतिरेकि । यथा पृथिवीइतरेभ्योभिद्यतेगंध
वत्त्वात् । यदितरेभ्यो न भिद्येतनगंधवत् । यथाजले । नचेयंतथा । तस्मान्न तथेति । अत्रयद्गंध
वन्नतत्तरिभिन्नमिति । अन्वयदृष्टांतोनास्ति । पृथिवीमात्रपक्षत्वात् । संदिग्धसाध्यवान्पक्ष
सः । यथाधूमवत्त्वेहेतोःपर्वतः । निश्चितसाध्यवान्सपक्षः । यथातत्रैवमहानसः । निश्चितसा
ध्याभाववान्विपक्षः । यथातत्रैवजलह्रदः । सव्यभिचारविरुद्ध सत्प्रतिपक्षासिद्धबाधिताः
पंचहेत्वाभासाः । सव्यभिचारोनैकांतिकः । सत्रिविधः । साधारणासाधारणानुपसंहारिभेदा
त् । तत्रसाध्याभाववद्वृत्तिःसाधारणोनैकांतिकः । यथापर्वतोवह्निमान् । प्रमेयत्वादिति । प्रमे
यत्वस्यवह्न्यभाववतिह्रदेपिविद्यमानत्वात् । सर्वविपक्षव्यावृत्तोऽसाधारणः । यथा
शब्दोनित्यः । शब्दत्वादिति । शब्दत्वंहिसर्वेभ्योनित्यानित्येभ्योव्यावृत्तंशब्दमात्रवृत्ति । अन्वयव्याप्ति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रकदृष्टान्तरहितोऽनुपसंहारिः · यथासर्वमनित्यंप्रमेयत्वादिति · अत्रसर्वस्यापिपक्षत्वान्दृष्टान्तो
सा नास्ति · साध्याभावव्याप्यहेतुर्विरुद्धः · यथाशब्दोनित्यः कार्यत्वादिति · कार्यत्वंनित्यत्वाभावेन
अनित्यत्वेनव्याप्तं · यस्माद्ध्याभावसाधकंहेत्वंतरंविद्यतेससत्प्रतिपक्षः · यथाशब्दोनित्यः श्रावण
त्वात् · शब्दत्ववत् · शब्दोऽनित्यः · कार्यत्वात् · घटवत् · असिद्धस्त्रिविधः · आश्रयासिद्धः · स्वरूपासि
द्ध्यव्याप्यत्वासिद्धश्चेति · तत्रआश्रयासिद्धोयथा · गगनारविंदंसुरभि · अरविंदत्वात् · सरोजारविंद
वत् · अत्रगगनारविंदमाश्रयःसचनास्त्येव · स्वरूपासिद्धोयथा · शब्दोगुणश्चाक्षुषत्वादिति · अत्र
चाक्षुषत्वंशब्देनास्ति · शब्दस्यश्रावणत्वात् · सोपाधिकोव्याप्यत्वासिद्धः · साध्यव्यापकत्वेसति
साधनाव्यापकत्वंउपाधिः · साध्यसमानाधिकरणात्यंताभावप्रतियोगित्वंसाध्यव्यापकत्वं · सा
धनवन्निष्ठात्यंताभावप्रतियोगित्वंसाधनाव्यापकत्वं · यथाधूमवान्वह्निमत्वाद्यत्रधू

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मसाध्येआर्द्रेधनसंयोगउपाधिः । तथाहि । यत्रधूमस्तत्रार्द्रेधनसंयोगउपाधिरिनिसाध्यव्यापकत्वात् ।
यत्रवह्निस्तत्रार्द्रेधनसंयोगोनास्ति अयोगोलकेआर्द्रेधनाभावात् एवंसाध्यव्यापकत्वेसतिसाधनाव्या
पकत्वात् आर्द्रेधनसंयोगउपाधिः । सोपाधिकत्वात् वह्निमत्वंव्याप्यत्वसिद्धं । यस्यसाध्याभावःप्रमा
णेननिश्चितःसोधिनः । यथावह्निरनुष्णः । द्रव्यत्वादिति । अत्रअनुष्णत्वंसाध्यंतद्भावउष्णत्वंस्पर्शप्रत्य
क्षेणागृह्यते । इतिवाधितत्वंव्याख्यानमनुमानं । उपमितिकरणमुपमानं । संज्ञासंज्ञिसंबंधज्ञानमुपमि
तिः । तत्करणंसादृश्यज्ञानं । अतिदेशवाक्यार्थस्मरणं । अत्रातिरव्यापारः । तथाहि । कश्चिद्वृद्धयशब्दार्थं
अजानन्नकुञ्चित्पुरुषाद्गोसदृशंगवयशब्दंनिशम्यवनांतरंगतोवाक्यार्थंस्मरन्गोसदृशंपश्यति । तद
नंतरंअयंगवयशब्दवाच्यइत्युपमितिरित्यर्थः । आप्तवाक्यंशब्दः । आप्तस्तुयथार्थवक्ता । वाक्यपदस
मूहः । यथागामानयशुक्लांदंडेनेति । शक्तंपदं । अस्मात्पदादयमर्थोबोद्धव्यइतिईश्वरसंकेतःशक्तिः । आ

+ इत्युपमितिः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कांक्षायोग्यता [redacted] सन्निधिश्चवाक्यार्थज्ञानहेतुः पदस्यपदान्तरव्यतिरेकअयुक्तान्वयाननुभ
वकत्वमाकांक्षा अर्थाबाधोयोग्यता पदानामविलंबेनोच्चारणंसन्निधिः आकांक्षादिरहितंवा
क्यमप्रमाणं यथागौरश्वःपुरुषोहस्तीतिनप्रमाणं आकांक्षाविरहात् अग्निनासिंचेदितिनप्रमा
णम् योग्यताविरहात् प्रहरंप्रहरंअसहाच्चारितानिगामानयेत्यादिपदानिनप्रमाणम् सन्नि
ध्याभावात् तद्वाक्यंद्विविधं वैदिकंलौकिकंच वैदिकमीश्वरेकृत्वात्सर्वमेवप्रमाणं लौकिकंतुआ
प्तोक्तंप्रमाणं अन्यदप्रमाणं वाक्यार्थज्ञानंशाब्दज्ञानं तत्करणंशब्दोनिप्रमाणं यथार्थानुभवोनिरू
पितः अयथार्थानुभवस्त्रिविधः संशयविपर्ययस्तर्कभेदात् एकस्मिन्धर्मिणिविरुद्धनानाधर्म
वैशिष्ट्यज्ञानंसंशयः यथास्थाणुर्वापुरुषोवेति [redacted] "मिथ्याज्ञानंविपर्ययः" मुक्ताविदंरजतमिति यथार
व्याप्यारोपेणव्यापकारोपस्तर्कः यथावह्निर्नस्यान्नहिधूमोनस्यादिति स्मृतिरपिद्विवि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धा॰ यथार्थऽयथार्थचेति॰ प्रमाजन्यायथार्थो॰ अप्रमाजन्याअयथार्थो॰ सर्वेषामनुकूलवेदनीयं
सुखं॰ सर्वेषांप्रतिकूलवेदनीयंदुःखं॰ इच्छाकामः॰ क्रोधोद्वेषः॰ कृतिप्रयत्नः॰ विहितकर्मजन्योध
र्मः॰ निषिद्धकर्मजन्योऽधर्मः॰ बुध्यादयोष्टावात्मामात्रविशेषगुणाः॰ बुद्धीस्मृतिप्रयत्नानित्याऽ
नित्याश्च॰ नित्याईश्वरस्य॰ अनित्याजीवस्य॰ संस्कारस्त्रिविधः॰ वेगोभावनास्थितिस्थापकश्च॰
वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः॰ अनुभवजन्यस्मृतिहेतुर्भावना॰ आत्ममात्रवृत्तिः॰ अन्यथा
कृतस्थचुनस्तदवस्थापकस्थितिस्थापकं॰ कदादिपृथिवीवृत्तिः॰ चलनात्मकंकर्म॰ द्रव्यद्वेय
संयोगहेतुरुत्क्षेपणं॰ अधोदेशसंयोगहेतुरवक्षेपणं॰ शरीरसन्निकृष्टहेतुराकुंचनं॰ विप्र
कृष्टसंयोगहेतुःप्रसारणं॰ अन्यत्सर्वंगमनम्॰ नित्यमेकमनेकानुगतंसामान्यम॰ द्रव्यगुणक
र्मवृत्ति॰ परंसत्ता॰ अपरंद्रव्यत्वादि॰ नित्यद्रव्यवृत्तयोव्यावर्तकाविशेषाः॰ नित्यसंबंधःसमवायः॰ अ

संयोग ३
रूपा॰

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

युतसिद्धवृत्तिः · यथाद्रव्यगुणकर्मसामान्यविशेषसमवायानामेकमविनाश्यदपराश्रितमेवावतिष्ठतेतावेवायुतसिद्धौ · यथाऽवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्चेति · अनादिः संसर्गः प्रागभावः उत्पत्तेः पूर्वकार्यस्य · सादिरनन्तः प्रध्वंसः उत्पत्त्यनन्तरं कार्यस्य · त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिकोऽन्योन्याभावः · यथाभूतले घटोनास्ति · तादात्म्यसंबंधावच्छिन्नप्रतियोगिकोऽन्योन्याभावः · यथाघटःपटोनभवति · सर्वेषामपिपदार्थानांयथायथमुक्तेष्वेवांतर्भावान्सप्तैवपदार्थाइतिसिद्धम् · ॥ कणादन्यायमतयोर्बालव्युत्पत्तिसिद्ध्यै · अन्नंभट्टेनविदुषारचितस्तर्कसंग्रहः ॥

यथा३

ति

नी

राम:

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi